# बोर्ड कृतिपत्रिका : मार्च २०२०

## आमोदः सम्पूर्ण-संस्कृतम्

**अवधिः होरात्रयम्** **गुणाङ्काः 80**

**सूचनाः**


(1) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।

(2) यथासूचनं आकलनकृतयः व्याकरणकृतयः आरेखितव्याः।

(3) आकृतीनाम् आलेखनं मसीलेखन्या कर्तव्यम्।


### प्रथमः विभागः- सुगमसंस्कृतम्। (8)


**1. अ. चित्रं दृष्ट्वा नामानि लिखत। (5 तः 4)** [4]

1) 

2) 

3) 

4) 

5) 

**आ. सङ्ख्याः अक्षरैः / अङ्कैः लिखत। (3 तः 2)** [2]

1. १८ 2. द्विनवतिः 3. ६५

**इ. समय-स्तम्भमेलनं कुरुत।** [2]

| क्र. | अ | आ |
|---|---|---|
| 1. | विंशत्यधिक-सप्तवादनम् | २.५० |
| 2. | सपाद-नववादनम् | १०.४५ |
| 3. | पादोन-एकादशवादनम् | ७.२० |
| 4. | दशोन-त्रिवादनम् | ९.१५ |

### द्वितीयः विभागः- गद्यम्। (20)

**2. अ. गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** [7]

किञ्चित्कालानन्तरं शृगालः मृगम् अवदत् , 'वनेऽस्मिन् एकं सस्यपूर्णक्षेत्रमस्ति। दर्शयामि त्वाम्।' तथा कृते मृगः प्रत्यहं तत्र गत्वा सस्यम् अखादत्। तद् दृष्ट्वा एकस्मिन् दिने क्षेत्रपतिना पाशः योजितः। तत्रागतः मृगः पाशैर्बद्धः। सः अचिन्तयत्, "इदानीं मित्राण्येव शरणं मम।" दूरात् तत् पश्यन् जम्बूकः मनसि आनन्दितः। सोऽचिन्तयत्, "फलितं मे मनोरथम्। इदानीं प्रभूतं भोजनं प्राप्स्यामि।" मृगस्तं दृष्ट्वा अब्रवीत्, "मित्र, छिन्धि तावन्मम बन्धनम्। त्रायस्व माम्।" जम्बूको दूरादेवावदत्, "मित्र, दृढोऽयं बन्धः। स्नायुनिर्मितान् पाशानेतान् कथं वा व्रतदिवसे स्पृशामि?" इत्युक्त्वा सः समीपमेव वृक्षस्य पृष्ठतः निभृतं स्थितः।

प्रदोषकाले मृगमन्विष्यन् काकस्तत्रोपस्थितः। मृगं तथाविधं दृष्ट्वा स उवाच, "सखे! किमेतत्?" मृगेणोक्तम्, "सुहृद्वाक्यस्य अनादरात् बद्धोऽहम्।

**1. अवबोधनम्। (4 तः 3)** **3**

**क. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।** 1

जम्बूकः मनसि आनन्दितः यतः .................।

(1) मृगः पाशैः बद्धः।

(2) जम्बूकस्य अन्येन सह मित्रता अभवत्।

**ख. कः कं वदति?** 1

"मित्र, छिन्धि तावन्मम बन्धनम्।"

**ग. पूर्णवाक्येन उत्तरं लिखत।** 1

क्षुद्रबुद्धिः कुत्र निभृतं स्थितः?

**घ. एषः गद्यांशः कस्मात् पाठात् उद्धृतः?** 1

**2. शब्दज्ञानम्। (3 तः 2)** **2**

**क. गद्यांशात् 2 पूर्वकालवाचक-धातुसाधित-त्वान्त-अव्यये चित्वा लिखत।** 1

**ख. प्रश्ननिर्माणं कुरुत।** 1

<u>प्रदोषकाले</u> मृगमन्विष्यन् काकः क्षेत्रे उपस्थितः।

**ग. लकारं लिखत।** 1

वने अस्मिन् एकं सस्यपूर्णक्षेत्रम् <u>अस्ति</u>।

**3. पृथक्करणम्।** **2**

**क्रमेण योजयत।**

(1) क्षेत्रपतिना पाशयोजनम्।

(2) शृगालेन मृगाय सस्यपूर्णक्षेत्रस्य दर्शनम्।

(3) मृगस्य पाशबन्धनम्।

(4) मृगस्य प्रत्यहं क्षेत्रं गमनम्।

**आ. गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** [7]

प्रसादः – (अग्रे आगत्य) नमस्ते। अहं रसायनशास्त्रस्य छात्रः। प्राचीनभारतीयरसायनशास्त्रम् इति मम संशोधनक्षेत्रम्। तद्विषयकाः ग्रन्थाः संस्कृतभाषया लिखिताः। शालायां यद् संस्कृताध्ययनं कृतं तस्य उपयुक्तताम् अहम् अधुना अवगच्छामि।

लीना – अहमपि भाषाशास्त्रम् अधीत्य बेङ्गलुरू इत्यत्र सॉफ्टवेअर-क्षेत्रे भारतीयभाषाविश्लेषिकारूपेण कार्यं करोमि। संस्कृतस्य ज्ञानम् आधुनिकभारतीय-भाषाणां विश्लेषणे अतीव साहाय्यकरं भवति इति मे अनुभवः।

तनुजाः – पार्श्वनिवेदनम् इति मे व्यवसायः। संस्कृतश्लोकादीनां पठनेन शब्दोच्चारणस्य उत्तमः अभ्यासः भवति। तेन अभिनये निवेदने च प्रभावः वर्धते। साम्प्रतं कलाक्षेत्रे कार्यरताः अस्मासु केचन भरतमुनेः नाट्यशास्त्रस्य अध्ययनं कुर्वन्ति।

समीरः – भोः, भारतीयविद्यायाः नाम भारतीयत्त्वज्ञान-योगशास्त्र-इतिहास-स्थापत्यादिशास्त्राणाम् अध्ययनाय विदेशेष्वपि नैके जनाः उत्सुकाः। तदर्थं काश्चन दूरचित्रवाहिन्यः अपि सन्ति। तत्र संस्कृततज्ज्ञानम् आवश्यकता वर्तते। मम सुहृद् आशयसम्पादकरूपेण तत्र कार्यरतः।

महोदया – अस्माभिः संस्कृतस्य अध्ययनं शालायां कृतम्। परं तस्य अनेन प्रकारेण उपयोजनं भवेदिति अस्माभिः नैव चिन्तितम्।

**1. अवबोधनम्। (4 तः 3)** **3**

**क. उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।** 1

(1) अस्माभिः संस्कृतस्य अध्ययनं ................. कृतम्। (शालायां / गृहे)

(2) संस्कृतश्लोकादीनां पठनेन शब्दोच्चारणस्य ................. अभ्यासः भवति। (उत्तमः / अन्तिमः)

**ख. पूर्णवाक्येन उत्तरं लिखत।** 1

प्रसादस्य संशोधनक्षेत्रं किम्?

**ग. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत।** 1

संस्कृतस्य ज्ञानम् आधुनिकभारतीय-भाषाणां विश्लेषणे अतीव साहाय्यकरं भवति।

**घ. अमरकोषात् शब्दं योजयित्वा वाक्यं पुनर्लिखत।** 1

मम सुहृद् आशयसम्पादकरूपेण तत्र कार्यरतः।

**2. शब्दज्ञानम्। (3 तः 2)** **2**

**क. गद्यांशात् 2 षष्ठीविभक्त्यन्तपदे चित्वा लिखत।** 1

**ख. गद्यांशात् विशेषणं चित्वा लिखत।** 1

(1) ...................................................... अभ्यासः।

(2) ...................................................... जनाः।

**ग. पूर्वपदं लिखत।** 1

(1) नैव = .............................. + एव।

(2) विदेशेष्वपि = .............................. + अपि।

**3. पृथक्करणम्।** **2**

**क. जालरेखाचित्रं पूरयत।**

विदेशीयाः जनाः उत्सुकाः

.............. अध्ययनाय

.............. अध्ययनाय

.............. अध्ययनाय

.............. अध्ययनाय

**इ. माध्यमभाषया सरलार्थं लिखत। (2 तः 1)** [4]

1. वसन्तसेना – (बाहू प्रसार्य) एहि मे पुत्रक! अनुकृतमनेन पितुः रूपम्। अथ किं निमित्तमेष रोदिति?

रदनिका – एतेन प्रतिवेशिक-दारकस्य सुवर्णशकटिकया क्रीडितम्, तेन च सा नीता, ततः पुनस्तां याचते ततो मया इयं मृत्तिकाशकटिका कृत्वा दत्ता। ततो भणति.. 'रदनिके! किं मम एतया मृत्तिकाशकटिकया, तामेव सौवर्णशकटिकां देहि' इति।

2. नदी (विपाट्) – कः खलु एषः मानवः? अस्मान् किमर्थं वन्दते स्तौति च? आर्य, किन्नामा भवान्? कस्माद् अस्मान् आह्वयति?

विश्वामित्रः – अयि मातः, विश्वामित्रोऽहम्। दूरतः आयातः रथैः शकटैः च। वयं सर्वे परतीरं गन्तुं समुत्सुकाः।

**ई. माध्यमभाषया उत्तरं लिखत। (2 तः 1)** [2]

1. 'तण्डुलान् आनय' इति पिता अर्णवं किमर्थम् आदिष्टवान्?

2. दुष्यन्तस्य कानि स्वभाववैशिष्ट्यानि ज्ञायन्ते?

## तृतीयः विभागः- पद्यम्। (18)

**3. अ. पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** [4]

> तावद् भयाद्धि भेतव्यं यावद् भयमनागतम्।
> आगतं तु भयं वीक्ष्य नरः कुर्याद् यथोचितम्।।
>
> यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि।
> निरस्तपादपे देशे एरण्डोऽपि द्रुमायते।।
>
> वृथाभ्रमणकुक्रीडापरपीडापभाषणैः।
> कालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत्।।

**1. पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत। (3 तः 2)** 2

**क. पूर्णवाक्येन उत्तरं लिखत।** 1

आगतं भयं वीक्ष्यः नरः किं कुर्यात्?

**ख. विशेषण-विशेष्ययोः मेलनं कुरुत।** 1


| | अ | आ |
|---|---|---|
| 1. | श्लाघ्यः | देशे |
| 2. | निरस्तपादपे | भयम् |
| | | अल्पधीः |

**ग. उत्तरपदं लिखत।** 1

(1) भयाद्धि = भयात् + ............... ।

(2) एरण्डोऽपि = एरण्डः + ............... ।

**2. पद्यांशं पठित्वा जालरेखाचित्रं पूरयत।** 2




**आ. माध्यमभाषया उत्तरं लिखत। (2 तः 1)** [2]

1. 'रे रे चातक' इति श्लोकं माध्यमभाषया स्पष्टीकुरुत।
2. जटायुरावणयोः सङ्घर्षस्यः वर्णनं कुरुत।

**इ. पद्ये शुद्धे पूर्णे च लिखत। (क, ख तः 1, ग, घ तः 1)** [6]

1. क. प्रथमवयसि ............... विस्मरन्ति।। **अथवा** ख. अयं ............... निर्धनो वा।। 4

2. ग. उत्तमो ............... प्रजायते।। **अथवा** घ. घटं ............... भवेत्।। 2

**ई. अन्वयं पूरयत।** [2]

.......................... पीतम् अल्पं तोयं स्मरन्तः .......................... निहितभाराः नारिकेलाः आजीवितान्तं नराणां (नरेभ्यः) अनल्पास्वादं .......................... ददति। साधवः कृतम् .......................... न हि विस्मरन्ति।

**उ. माध्यमभाषया सरलार्थं लिखत। (3 त: 2)** [4]

1. अद्ययावद्धि ज्ञानाय वृत्तपत्रं पठेत्सदा। 2
सर्वविधसुविद्यार्थं वाचनमुपकारकम्।।

2. यथा प्रकाशयत्येको भानुर्भुवनमण्डलम्। 2
धर्मान् प्रकाशयत्येकस्तथा मानवतागुण:।।

3. वाल्मीकिव्यासबाणाद्या: प्राचीना: कविपण्डिता:। 2
तान् शिक्षयन्ति सततं ये सदा वाचने रता:।।

## चतुर्थ: विभाग:- लेखनकौशलम्। (9)

**4. अ. धातूनाम् अव्ययानां च विशिष्टविभक्ते: उपयोगं कृत्वा वाक्यनिर्माणं कुरुत। (6 त: 4)** [4]

(क) उभयत: (ख) ऋते (ग) कृते

(घ) वि + तॄ (1 प.प.) (च) रुच् (1 आ.प.) (छ) रक्ष् (1 प.प.)

**अथवा**

**संस्कृतानुवादं कुरुत। (6 त: 4)**

1. विद्यार्थी प्रश्न विचारतात.
विद्यार्थी प्रश्न पूछते हैं।
Students ask question.

2. मी उद्या वही आणेन.
कल मैं कापी लाऊँगी।
Tomorrow I will bring the note-book.

3. सूर्योदयाच्या वेळी सूर्याचा रंग लाल असतो.
सूर्योदय के समय सूर्य का रंग लाल होता है।
The colour of the Sun is red at the time of sunrise.

4. पशू घनदाट अरण्यात राहतात.
पशू घने जंगल में रहते हैं।
Animals live in the dense forest.

5. ती वाचनालयात जाऊन वाचते.
वह पुस्तकालय जाकर पढ़ती है।
Having gone to library she reads.


6. तुम्ही (दोघे) बागेत जा.
तुम (दोनों) बगीचे में जाओ।
(Both of) you go to the garden.

**आ. 5/7 वाक्यात्मकं निबन्धं लिखत। (3 त: 1)** [5]

1. मम प्रिय:कवि:। 2. भारतीयं प्रसिद्धं स्थलम्। 3. मम प्रिय: उत्सव:।

**अथवा**

**साहाय्यक-शब्दानाम् आधारेण 5 / 7 वाक्यात्मकं चित्रवर्णनं कुरुत।**




(मञ्जूषा- विक्रीणाति, दर्शयति, यच्छति, पश्यति, खादति, धरति, गृह्णाति)

## पञ्चमः विभागः- भाषाभ्यासः। (17)

**5. अ. तालिकापूर्तिं कुरुत।** [8]

1. नामतालिका। **(6 त: 4)** 2

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| राजा | .......................... | .......................... | प्रथमा |
| .......................... | पितृभ्याम् | .......................... | तृतीया |
| .......................... | .......................... | वणिजाम् | षष्ठी |

2. सर्वनामतालिका। **(6 त: 4)** 2

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| .......................... | .......................... | सर्वाः | द्वितीया |
| .......................... | आवाभ्याम्-नौ | .......................... | चतुर्थी |
| भवतः | .......................... | .......................... | पञ्चमी |

3. क्रियापदतालिका। **(6 त: 4)** 2

| लकार: | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुष: |
|---|---|---|---|---|
| लोट् | यच्छतु | .......................... | .......................... | प्रथम: पुरुष: |
| लट् | .......................... | भाषेथे | .......................... | मध्यम: पुरुष: |
| लृट् | .......................... | .......................... | करिष्याम: | उत्तम: पुरुष: |

4. धातुसाधित-विशेषण-तालिका। **(6 त: 4)** 2

| धातु: | क्त | क्तवतु | कृत्या: | शतृ/शानच् |
|---|---|---|---|---|
| पा (पिब्) (1 प.प) | पीत: | ................... | पातव्य: | ................... |
| नृत् (4 प.प.) | ................... | नर्तितवान् | ................... | नृत्यन् |
| गण् (10 प.प.) | गणित: | ................... | गणनीय: | ................... |

**आ. निर्दिष्टा: कृती: कुरुत। (4 त: 3)** **[9]**

**1. योग्यं रूपं लिखित्वा रिक्तस्थानपूर्तिं कुरुत। (5 त: 3)** 3

क. ................... (1) दिने शङ्कर: स्नानार्थं पूर्णानदीं गत:। (सङ्ख्यावाचकम्)

ख. श्रीकृष्ण: देवक्या: ................... (8) अपत्यम्। (क्रमवाचकम्)

ग. सप्ताहस्य ................... (3) संस्कृतवर्ग: भवति। (आवृत्तिवाचकम्)

घ. भोजने ................... (6) रसेषु मधुर: रस: मम प्रिय:। (सङ्ख्यावाचकम्)

च. वर्षस्य ................... (4) परीक्षा भवति। (आवृत्तिवाचकम्)

**2. समासानां तालिकापूर्तिं कुरुत। (5 त: 3)** 3

| | समस्तपदम् | विग्रह: | समासनाम |
|---|---|---|---|
| क. | चिन्ताकुल: | चिन्तया आकुल:। | .......................... |
| ख. | .......................... | पुस्तकस्य पठनम्। | षष्ठी-तत्पुरुष:। |
| ग. | शुकसारिका: | ..........................। | इतरेतर-द्वन्द्व:। |
| घ. | अरुचि: | ..........................। | नञ्-तत्पुरुष:। |
| च. | .......................... | भरत: नाम मुनि:। | कर्मधारय:। |

**3. समानार्थकशब्दान्/विरुद्धार्थकशब्दान् लिखत। (5 त: 3)** 3

क. मित्रम् = ..........................। ख. प्रसन्न: × ..........................।

ग. धनु: = ..........................। घ. विपुलम् × ..........................।

च. प्राक् × ..........................।

**4. सूचनानुसारं कृती: कुरुत। (5 त: 3)** 3

क. सर्वे धर्मा: मानवतागुणं शंसन्ति। (वाच्यपरिवर्तनं कुरुत।)

ख. भूमि: स्त्रीरूपं धृत्वा तस्य पुरत: प्रकटिता अभवत्। (पूर्वकालवाचक-त्वान्त-अव्ययं निष्कासयत।)

ग. त्वं किम् इच्छसि। ('त्वम्' इत्यस्य स्थाने 'भवान्' इति योजयत।)

घ. जना: न सन्तुष्टा:। (एकवचने परिवर्तयत।)

च. मिहिर: आदित्यं पातयति। (णिजन्तं निष्कासयत।)

## षष्ठः विभागः- अपठितम्। (8)

**6. अ. गद्यांशं पठित्वा कृतीः कुरुत। (6 तः 4)** [4]

चितोडस्य नृपः वीरवरः महाराणाप्रतापः बाल्यात्प्रभृति निर्भयः उदारश्च आसीत्। यदा सः राजा अभवत् तदा सः प्रतिज्ञाम् अकरोत्, " तावदहं सुखानि न सेविष्ये यावद् मम देशः स्वतन्त्रः न भवति।" परेषाम् ऐश्वर्येण सुखसाधनैः स न कदापि संमोहितः। तस्य मनः नित्यं स्वातन्त्र्यप्राप्तेः विचारैः व्यापृतमासीत्। युद्धभूमौ मृत्युसमयेऽपि स देशस्य स्वतन्त्रताविषये चिन्तयति स्म। मनसा स्मरामः तं महान्तं देशभक्तम्।

**1. पूर्णवाक्येन उत्तरत।** 1

चितोडस्य नृपः कः?

**2. प्रातिपदिकं लिखत।** 1

(क) सुखानि। (ख) तस्य।

**3. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत।** 1

परेषाम् ऐश्वर्येण सुखसाधनैः स संमोहितः।

**4. माध्यमभाषया सरलार्थं लिखत।** 1

युद्धभूमौ मृत्युसमयेऽपि स देशस्य स्वतन्त्रताविषये चिन्तयति स्म।

**5. गद्यांशात् प्रथमा विभक्त्यन्तपदं चिनुत लिखत च।** 1

**6. कारकपरिचयं कुरुत।** 1

<u>मनसा</u> स्मरामः तं महान्तं देशभक्तम्।

**आ. 1. पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।** [2]

नमामि शारदां देवीं विद्यारम्भे सुमङ्गलाम्।
नरः तस्याः प्रसादेन पाण्डित्यं लभते सदा।।

**(क) पूर्णवाक्येन उत्तरत। (2 तः 1)** 1

(1) नरः शारदायाः प्रसादेन किं लभते?

(2) कविः कां नमति?

**(ख) समानार्थकं शब्दं लिखत।** 1

शारदा = ..........................।

**आ. 2. पद्यांशं पठित्वा जालरेखाचित्रं पूरयत।** [2]

शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।
ऊहापोहः अर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः।।

